## - पूर्वाङ्गपूजा -

1. **<u>अथ गणेशस्मरणम् –</u>** (नमस्कारमुद्रा)

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

2. **<u>अथ गुरुस्मरणम् –</u>** (नमस्कारमुद्रा)

ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः। गुरुः साक्षात्परब्रह्म तस्मै श्री गुरवे नमः॥

3. **<u>अथ प्रार्थना –</u>** (नमस्कारमुद्रा)

ॐ सर्वमङ्गलमाङ्गल्यं वरेण्यं वरदं शुभम्। नारायणं नमस्कृत्य सर्वकर्माणि कारयेत्॥

4. **<u>अथ दीपप्रोज्वलनम् –</u>** (Offer a flower)

प्रधानसाधारविकल्पसत्ता स्वभावभावाद्भुवनत्रयस्य।
सा विद्यया व्यक्तमपीह माया ज्योतिः परा पान्तु जगन्ति नित्यम्॥ ॐ तेजस्वरूप-श्रीदुर्गायै नमः॥

5. **<u>अथ आचमनम् –</u>** (sip water thrice, wash your right hand & touch the right ear)

ॐ केशवाय स्वाहा। ॐ नारायणाय स्वाहा। ॐ माधवाय स्वाहा। ॐ गोविन्दाय नमः।

6. **<u>अथ अन्तर्बाह्यशुद्धिः –</u>** (sprinkle water on your body)

ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।
ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः॥

7. **<u>अथ तीर्थनिर्मितिः –</u>**

ॐ इमा आपः शिवा सन्तु शुद्धापूताश्च निर्मलाः। पावना शीतलाश्चैव पूता सूर्यस्य रश्मिभिः॥ (touch water)

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥ (उद्धरणी towards east)

8. **<u>अथ घण्टापूजनम् –</u>**

ॐ घण्टस्थितः (श्रीगरुडेश्वराय) नमः। ॐ जयध्वनि-मन्त्र-मातृकाभ्यः स्वाहा। (offer गन्धपुष्प)
ॐ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्। कुर्वे घण्टारवं तत्र देवताह्वानलक्षणम्॥ (ring the bell)

9. **<u>अथ आसनशुद्धिः –</u>**

ॐ अस्य आसनोपेवशन-महामन्त्रस्य मेरुपृष्ठ-ऋषिः सुतलं छन्दः कूर्मो देवता आसनोपवेशने विनियोगः। (न्यास)
ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥ (sprinkle water on आसन) ॐ ह्रीं एते गन्धपुष्पे आधारशक्तये कमलासनाय नमः। (offer गन्धपुष्प)

10. **<u>अथ भूतापसरणम् –</u>** (Throw अक्षता on all sides)

ॐ अपसर्पन्तु ते भूताः ये भूता भुविसंस्थिताः। ये भूता विघ्नकर्तारः ते नश्यन्तु शिवाज्ञया॥

11. **<u>अथ प्राणायामः –</u>** (Do प्राणायाम)

यज्ञोपवितम् – (offer अक्षताः)

ॐ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्। उपवीतं मया दत्तं गृह्णन्तु परमेश्वराः॥

10. चन्दनम् –

ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥ (कुंकुमम्, अक्षता, पुष्पम्)

11. पुष्पमाला – (offer flowers)

ॐ माल्यादीनि सुगन्धीनि मालत्यादीनि भक्तितः। मयाऽऽहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्॥ (पुष्पार्चना)

12. धूपम् –

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम॥

ॐ श्री .......... नमः। धूपम् आघ्रापयामि॥

13. दीपम् –

ॐ दीपं गृहाण देवेश वर्तित्रय-समन्वितम्। अन्धकारे नमस्तुभ्यम् अज्ञानं विनिवर्तताम्॥

ॐ श्री .......... नमः। दीपं सन्दर्शयामि॥ धूप-दीपान्ते आचमनम् समर्पयामि॥

14. अथ नैवेद्यम् –

वं एतस्मै सोपकरण-नैवेद्याय नमः। (sprinkle water)

एते गन्धपुषे एतस्मै सोपकरण-नैवेद्याय नमः। (offer तुलसी)

सत्यं त्वर्थेन परिषिञ्चामि। ॐ भूर्भुवस्सुवरोम्। (circle water)

ॐ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु। ईप्सितं मे वरं देहि नित्यतृप्त नमोऽस्तु ते॥

अमृतोपस्तरणमसि स्वाहा। (offer ghee)

ॐ श्री .......... नमः। नैवेद्यं निवेदयामि।

प्राणाय स्वाहा। अपानाय स्वाहा। व्यानाय स्वाहा। उदानाय स्वाहा। समानाय स्वाहा। ब्रह्मणे स्वाहा।

मध्ये मध्ये अमृतपानीयं समर्पयामि। पुनराचमनीयं समर्पयामि। (offer water)

15. ताम्बूलम् – ॐ पूगीफलं महद् दिव्यं नागवल्लीदलैर्युतम्। एलालवंगसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

ॐ श्री .......... नमः। ताम्बूलं निवेदयामि॥

16. दक्षिणा – ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्त पुण्यफलदम् शश्वत् शान्तिं प्रयच्छ मे॥

ॐ श्री .......... नमः। सुवर्णपुष्पदक्षिणां समर्पयामि॥

कर्पूर आरति – (show lamp & offer water & flower at the end)

ॐ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥

ॐ श्री .......... नमः। कर्पूरनिराजनं समर्पयामि॥

प्रदक्षिण-नमस्कारः – ॐ यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे॥

ॐ श्री .......... नमः। प्रदक्षिण-नमस्कारान् समर्पयामि॥

## - उत्तरपूजा -

1. अथ क्षमापणम् – आवाहनं न जानामि न जानामि विसर्जनम्।पूजां चैव न जानामि क्षमस्व परमेश्वर॥
2. अथ समर्पणम् – कायेन वाचा... त्वमेव माता...
3. अथ उद्वासनम् – ॐ क्षमस्व क्षमस्व उद्वस्वयामि। यथा स्थानं प्रतिष्ठापयामि।
4. अथ दिग्विमोक्षः – ॐ भूर्भुवस्स्वरोम् इति दिग्विमोक्षः।
5. अथ शान्तिमन्त्रः – ॐ पूर्णमदः पूर्णमिदं ...